# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ८३

तत्सर्वमखिलेनाशु प्रस्थाप्य भरताग्रजः ।
हयं लक्ष्मणसम्पन्नं कृष्णसारं मुमोच ह ॥१॥

ऋत्विग्भिर्लक्ष्मणं सार्धमश्वे च विनियुज्य सः ।
ततोऽभ्यगच्छत्काकुत्स्थः सह सैन्येन नैमिषम् ॥२॥

यज्ञवाटं महाबाहुर्दृष्ट्वा परममद्भुतम् ।
प्रहर्षमतुलं लेभे श्रीमानिति च सोऽब्रवीत् ॥३॥

नैमिषे वसतस्तस्य सर्व एव नराधिपाः ।
आजग्मुः सर्वराष्ट्रेभ्यस्तान्रामः प्रत्यपूजयत् ॥४॥

उपकार्यान्महार्हांश्च पार्थिवानां महात्मनाम् ।
सानुगानां नरश्रेष्ठो व्यादिदेश महाद्युतिः ॥५॥

अन्नपानानि वस्त्राणि सानुगानां महात्मनाम् ।
भरतः सन्ददावाशु शत्रुघ्नसहितस्तदा ॥६॥

वानराश्च महात्मानः सुग्रीवसहितास्तदा ।
विप्राणां प्रणताः सर्वे चक्रिरे परिवेषणम् ॥७॥

विभीषणश्च रक्षोभिः स्रग्विभिर्बहुभिर्वृतः ।
ऋषीणामुग्रतपसां किङ्करः पर्युपस्थितः ॥८॥

एवं सुविहितो यज्ञो हयमेधोऽभ्यवर्तत ।
लक्ष्मणेनाभिगुप्ता च हयचर्या प्रवर्तिता ॥९॥

नान्यः शब्दोऽभवत्तत्र हयमेधे महात्मनः ।
छन्दतो देहि विस्रब्धो यावत्तुष्यन्ति याचकाः ।
तावद्वानररक्षोभिर्दत्तमेवाभ्यदृश्यत ॥१०॥

न कश्चिन्मलिनस्तत्र दीनो वाप्यथ वा कृशः ।
तस्मिन्यज्ञवरे राज्ञो हृष्टपुष्टजनावृते ॥११॥

ये च तत्र महात्मानो मुनयश्चिरजीविनः ।
नास्मरंस्तादृशं यज्ञं दानौघसमलङ्कृतम् ॥१२॥

रजतानां सुवर्णानां रत्नानामथ वाससाम् ।
अनिशं दीयमानानां नान्तः समुपदृश्यते ॥१३॥

न शक्रस्य न सोमस्य यमस्य वरुणस्य वा ।
ईदृशो दृष्टपूर्वो न एवमूचुस्तपोधनाः ॥१४॥

सर्वत्र वानरास्तस्थुः सर्वत्रैव च राक्षसाः ।
वासो धनानि कामिभ्यः पूर्णहस्ता ददुर्भृशम् ॥१५॥

ईदृशो राजसिंहस्य यज्ञः सर्वगुणान्वितः ।
संवत्सरमथो साग्रं वर्तते न च हीयते ॥१६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com